**35b** सूचीलोमा ] शूचिरोमा R **35d** दण्डः काश्यप एव ] दण्डकास्यस्तथैव R **36d** °कारक एव ] °कारस्तथैव R **37c** कालकञ्जाः ] कालकञ्जा R **38c** सर्वाः ] सर्व्वे R **38d** षष्टिः ] षष्टि R **39b** °ष्यान्पन्नगा° ] °ष्यान्यन्वगा° R **39cd** ] राक्षसांश्च पिशाचांश्च यक्षान् पक्षिगणानपि R **40a** समाविश्य ] समासाद्य R **40b** दर्पात् ] दर्पाः R **40d** °वृड्जलधरा ] °वृद्काले म्बदा R **41a** स्रवन्त इवाम्भोदा ] प्रवन्त इवाम्भोद R **41d** °नागता ] °नाशला R

---

**37a** षष्टिसाहस्राः ] $A_3A_4$, षष्ठिसाहश्रो $A_7$ **37c** कालकञ्जाः ] कालकञ्च **A** **38b** कोट्यो ] $A_3A_4$, कोट्या $A_7$ • महाबलाः ] $A_7$, महाबला $A_3A_4$ **38c** सर्वाः ] सर्वे **A** **38d** कोट्यः ] $A_7$, कोट्य $A_3$, कोट्ये $A_4$ • षष्टिः ] $A_3$, षष्टि $A_4$, षष्ठि $A_7$ **39a** तत्पक्षान् ] उत्पक्षा **A** **39b** मनुष्यान्पन्नगानपि ] मानव्यामानुगानपि $A_3A_4$, मानव्यासानुगा अपि $A_7$ **39f** °संगताः ] °सत्तमाः **A** **40b** सर्वे दर्पात् ] सर्वदेवा $A_3A_4$, सर्व्वदेव $A_7$ **40c** °दुल्काः ] $A_3$, °दुत्का $A_4$, °दुद्धा $A_7$ **40d** प्रावृड्जल° ] पूर्णा जल° **A** **41a** स्रवन्त ] द्रवन्त $A_3A_7$, द्रवंता $A_4$ **41b** सधूमा ] साधुना **A** **41c** नर्दन्तः ] $A_3A_4$, नर्द्दन्त $A_7$ **41d** केतवो ऽनागता इव ] कवचा नाशनानिव $A_3$, कवचां नाशनानि च $A_4$, कवाचो नाशनानिव $A_7$

---

**35**⟨$c^3$–$c^5$⟩($c^6$–$d^1$) $S_3$ **37**⟨$b^1$⟩($b^2$) $S_2$ **39**⟨$e^1$–$e^8$⟩ $S_2$ (supplied by a modern hand i.m. possibly from a broken-off fragment)

---

**35a** खरो ऽथ ] $S_2$RBh, खरोष $S_3$ **36a** °कायः ] $S_2$RBh, °काय $S_3$ **37a** °साहस्राः ] R$A_3A_4$Bh, °सहस्रा $S_2$ (unmetrical), °साहस्रा $S_3$ **37b** कालकेया° ] $S_3$R**A**Bh, ⏑(ल)केशा° $S_2$ **37c** कालकञ्जाः ] $S_2^{pc}$Bh, कालकञ्जा $S_2^{ac}$, कालकञ्ज $S_3$ **38a** °कवचा° ] $S_2^{pc}S_3$R**A**Bh, °कवाचा° $S_2^{ac}$ **38b** कोट्यो ] R$A_3A_4$Bh, कोट्य $S_2$, कोट्या $S_3$ **38c** गणिताः सर्वाः ] $S_2^{pc}$Bh, गणिता सर्वा $S_2^{ac}S_3$ **38d** कोट्यः ] $S_2^{pc}$R$A_7$Bh, कोट्य $S_2^{ac}$, कोट्या $S_3$ • षष्टिः ] $A_3$Bh, शष्टि $S_2^{ac}$, षष्टि⟨+:+⟩ $S_2^{pc}$, षष्ठि $S_3$ **39a** °न्वर्जयित्वा ] $S_2$RBh, °न्वजर्यित्वा $S_3$ (unmetrical) **39cd** °साश्च पिशाचाश्च यक्षाः ] $S_2S_3$**A**, °सांश्च पिशाचांश्च यक्षान् Bh (conj.) **39f** कोट्यो ] R**A**Bh, कोट्ये $S_2$, कोट्या $S_3$ • °संगताः ] $S_2S_3$R, °संमिताः Bh (conj.) **40a** सभां ] $S_2$R**A**Bh, सभा $S_3$ **40d** °वृड्जल° ] Bh (em.?), °वृङ्जल° $S_2S_3$ **41a** स्रवन्त ] $S_2S_3$, स्वनन्त Bh (conj.) **41c** नर्दन्तः ] R$A_3A_4$Bh, नर्द्दन्तो $S_2$, नर्दन्तो $S_3$

उत्पाता इव निघ्नन्तः सविषा इव पन्नगाः।
गजा इव च संमत्ताः पवना इव वेगिताः।
सुराणां विप्रकारार्थं तस्थुरापूर्य तां सभाम्॥ ४२॥
अथ गत्वा सभापालो राजानमिदमब्रवीत्।
सुखासीनं तदा व्यास सिंहासनगतं युवा॥ ४३॥
प्रणम्य शिरसा पूर्वं जानुभ्यामवनिं गतः।
बद्धाञ्जलिपुटः सम्यग्वाचा श्लक्ष्णपदाक्षरम्॥ ४४॥
स्वामी जयतु सर्वेषामसुराणां जयावहः।
प्रह्लादाद्याः सभां सर्वे विप्रचित्तिपुरोगमाः।
प्राप्ता विदितमस्त्वेव यदन्यत्कर्तुमर्हसि॥ ४५॥
सनत्कुमार उवाच।
ततः सुरद्विषः श्रुत्वा सर्वान्प्राप्तान्सभां तदा।
उत्तस्थौ सहसा राजा शक्रकेतुरिवोत्सवे॥ ४६॥
स किरीटी महादंष्ट्रो मुञ्जकेशो महाहनुः।
आ कर्णाद्दारितास्यश्च महाछत्तृशिरास्तथा॥ ४७॥

---

**42e** विप्रकारार्थं ] द्विषतो रम्यां R **43d** युवा ] मुने R **44b** ॰मवनिं ] ॰मवनीं R **44c** बद्धाञ्जलि॰ ] बद्धाञ्जलि॰ R **44d** श्लक्ष्ण॰ ] सूक्ष्म॰ R **45a** जयतु ] भवांश्च R **45c** प्रह्लादा॰ ] प्रह्रादा॰ R **45e** प्राप्ता ] प्राप्तो R • ॰मस्त्वेव ] ॰मस्त्ये⟨व⟩तद् R **47c** आ कर्णाद्दा॰ ] आकर्णदा॰ R **47d** महाछत्तृशिरास्तथा ] महच्छत्तृशिरस्तथा R

---

**42a** उत्पाता इव निघ्नन्तः ] उत्पपाता इवाघ्नंत{इवाध्वंतः $A_4$, इव घ्नन्त $A_7$} **A** **42c** गजा ] $A_4$, जगा $A_3$, गज $A_7$ (unmetrical) • संमत्ताः ] संमत्ता $A_3$, संमंत्ताः $A_4$, सन्मत्ताः $A_7$ **42e** विप्रकारार्थं ] द्विषतां रम्यं $A_3A_4$, द्विषतां रम्यां $A_7$ **43c** सुखासीनं ] अथासीनं $A_3A_4$, तथासीनं $A_7$ **43d** युवा ] पुरा **A** **44cd** ॰पुटः सम्यग्वाचा श्लक्ष्णपदाक्षरम् ] ॰पुटो वाच{भूत्वा $A_4$}मुवाच श्लक्ष्णया गिरा{॰राः $A_4$} **A** **45a** जयतु ] भवांश्च **A** **45c** प्रह्लादाद्याः ] $A_3A_7$, प्रह्लाद्याः $A_4$ (unmetrical) • सभां ] सतां **A** **45e** ॰स्त्वेव ] ॰स्त्वेवं **A** **47a** स किरीटी ] मत्किरीट **A** • ॰दंष्ट्रो ] $A_3A_4$, ॰द्रंष्को $A_7$ **47b** मुञ्ज॰ ] भुंज॰ $A_3$, मुञ्जो॰ $A_4$, मुञ्च॰ $A_7$ **47c** आ कर्णाद्दा॰ ] आकर्णदा॰ **A** **47d** ॰छत्तृ॰ ] ॰वक्र॰ $A_3$, ॰चक्र॰ $A_4$, ॰जक्र॰ $A_7$ • ॰स्तथा ] ॰स्तदा **A**

---

**42a** निघ्नन्तः ] $S_2^{pc}$R, निघ्नन्त $S_2^{ac}S_3$, निर्मुक्ताः Bh (conj.?) **42b** सविषा ] $S_2$R**A**Bh, सविशा $S_3$ • पन्नगाः ] $S_2$R**A**Bh, पनगाः $S_3$ (unmetrical) **42c** संमत्ताः ] $S_2$RBh, सम्पन्ना $S_3$ **42d** पवना ] $S_2S_3^{pc}$R**A**Bh, पन्नगा $S_3^{ac}$ **42e** ॰कारार्थं ] $S_2$Bh, ॰कारार्थ $S_3$ **42f** तां सभाम् ] R**A**Bh, तांस्सभाम् $S_2^{pc}$, तस्सभाम् $S_2^{ac}$, तसभां $S_3$ (unmetrical) **43b** ॰मब्रवीत् ] $S_2^{pc}S_3$R**A**Bh, ॰म⟨वी⟩+ब्र+वीत् $S_2$ **43d** युवा ] em. Bh (silently), युवाः $S_2S_3$ **44c** ॰पुटः ] RBh (em.?), ॰पुटो $S_2S_3$ **45a** स्वामी ] $S_2^{ac}$R**A**Bh, स्वामिन् $S_2^{pc}$, स्वमी $S_3$ **45b** ॰मसुराणां ] $S_2$R**A**Bh, ॰मसुराणा $S_3$ • ॰यावहः ] $S_2^{ac}S_3$R**A**Bh, ॰यावह $S_2^{pc}$ **45c** प्रह्लादाद्याः ] $A_3A_7$, प्रह्रादाद्याः $S_2^{pc}$Bh, प्रह्रादाभ्यां $S_2^{ac}S_3$ • सभां ] $S_2$RBh, सभा $S_3$ **45d** ॰पुरोगमाः ] $S_2^{pc}$R**A**Bh, ॰पुरोगमां $S_2^{ac}S_3$ **45f** यदन्यत् ] $S_2$R**A**Bh, यदन्य $S_3$ **46b** सर्वान् ] $S_2$R**A**Bh, सर्वा $S_3$ • ॰प्तान्सभां तदा ] R**A**Bh, ॰प्तां सभांस्तदा $S_2S_3$ **47a** किरीटी ] $S_2^{pc}$RBh, किरीटि $S_2^{ac}S_3$ • ॰दंष्ट्रो ] $S_2$R$A_3A_4$Bh, ॰द्रष्टो $S_3$ **47c** आ कर्णाद्दा॰ ] em. Bh (silently), आ कर्णार्द्दा॰ $S_2$, आकर्णदा॰ $S_3$

आजानुबाहुर्वृत्ताक्षः पिङ्गाक्षश्चोर्ध्वरोमवान् ।
वज्रसंहननश्चैव महायोगी महाबलः ।
किरीटेनातिसंभाति रविणेवोदयस्तथा ॥ ४८ ॥
हारवर्याङ्कितोरस्कः सबलाक इवाम्बुदः ।
सपुत्रः प्रययौ व्यास हिमवानिव मूर्तिमान् ॥ ४९ ॥
स तां तदा दानवराजसत्तमो विचित्ररत्नांशुपरीतकुण्डलः ।
सभां विवेशासुरदैत्यपुङ्गवैः समावृतां द्यामुदितैर्ग्रहैरिव ॥ ५० ॥

इति स्कन्दपुराणे षट्सप्ततितमो ऽध्यायः ॥ ७६ ॥

---

**48a** ◦बाहुर्वृत्ताक्षः ] ◦बाहुधृक् रक्षः R **48b** ◦श्चोर्ध्व◦ ] ◦श्चोर्द्ध◦ R **48e** किरीटेनातिसंभाति ] स विभाति किरीटेन R **48f** ◦णेवोदयस्तथा ] ◦णा चोदयो गिरिः R **49ab** हारवर्याङ्कितोरस्कः स◦ ] हरेर्वय्याक्षितोरक्ष्य सु◦ R **50a** स तां तदा ] सभां ततो R • ◦सत्तमो ] ◦सत्तमा R **50b** ◦कुण्डलः ] ◦कुण्डलाः R **Col.** इति स्कन्दपुराणे रेवाखण्डे सभाप्रवेशो नामाध्यायः R

---

**48a** आजानु◦ ] अजानृ◦ $A_3$, अजानु◦ $A_4A_7$ • ◦बाहुर्वृत्ताक्षः ] ◦बाहुशुद्धाभः $A_3A_4$, ◦बाहुवृद्धाशु $A_7$ **48b** पिङ्गाक्षश्चोर्ध्व◦ ] पिंगाभ्रुः शुद्ध◦ $A_3A_4$, पिङ्गभ्रुशुद्ध◦ $A_7$ **48e** ◦नातिसंभाति ] ◦न विभाती{◦ति $A_7$(unmetrical)} स **A** **48f** रविणेवो◦ ] $A_7$, रविनेवो◦ $A_3$, रविनैवो◦ $A_4$ • ◦दयस्तथा ] ◦दयः शुभः **A** **49a** ◦वर्याङ्कितोरस्कः ] ◦पर्य्यांकितारक्षः **A** **49cd** ] om. **A** **50a** स तां तदा ] सभां ततो **A** **50b** ◦परीत◦ ] ◦पवित्र◦ **A** **50c** सभां ] $A_3A_4$, शभां $A_7$ • ◦दैत्यपुङ्गवैः ] $A_7^{pc}$, ◦दैटकांबुदामत्तान् यथेंद्रः समुप{◦पै◦ $A_3$}त्य पुंगवैः $A_3A_4$ (unmetrical), ◦दै⟨ववृटकाम्बुदान्मत्तान्मथेन्द्रः समुप⟩त्यपुङ्गवैः $A_7$ (cf. 77.1cd) **50d** ] समावृता{◦त्ता $A_3$}द्यौर्मुदितैर्गृहैरिव $A_3A_4$, समावृतां कुमुदितैर्गृहैरपि $A_7$ (unmetrical) **Col.** इति{इति श्री◦ $A_3$} स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे सभाप्रवेशो नामाध्यायः **A**±

---

**50**⟨←$a^1$–$c^8$⟩($d^4$) $S_1$

---

**48a** आजानुबाहु◦ ] $S_2$RBh, अजानुबाह◦ $S_3$ **48d** महाबलः ] $S_2S_3$R**A**, महाबल Bh (typo) **48f** रविणेवो◦ ] $A_7$, सविणाचो◦ $S_2^{ac}S_3$, सविता चो◦ $S_2^{pc}$, सवित्रेवो◦ Bh (conj.?) • ◦दयस्तथा ] $S_2^{ac}$ $S_3$Bh, ◦दये तथा $S_2^{pc}$ **49a** ◦तोरस्कः ] $S_2^{pc}$Bh, ◦तोरस्क $S_2^{ac}$, ◦तोरस्का $S_3$ **49c** सपुत्रः ] $S_2^{pc}$RBh, सपुत्र $S_2^{ac}S_3$ **50b** ◦रत्नांशु◦ ] $S_2$R**A**Bh, ◦रंनांशु◦ $S_3$ **50c** सभां ] $S_2^{pc}S_3$R$A_3A_4$Bh, साभाम् $S_2^{ac}$ **50d** ◦मुदितैर्ग्रहैरिव ] RBh, ◦मुदितैर्ग्रहैरिवेति $S_2S_3$ (इति part of col.), ◦मुदितैरिवेति $S_1$ (unmetrical; इति part of col.) **Col.** स्कन्दपुराणे शताप्रवेशाध्यायः॥ ⊙ $S_1$, स्कन्दपुराणे पञ्चसप्तर्यो ध्यायः॥ $S_2$, ⊙॥ स्कन्दपुराणे नामाध्यायः ७५ (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे हिरण्याक्षस्य सभाप्रवेशो नाम षट्सप्ततितमो ऽध्यायः Bh

# सप्तसप्ततितमो ऽध्यायः।

सनत्कुमार उवाच।
स गत्वा तां सभां व्यास अपश्यद्दैत्यदानवान्।
प्रावृट्काले ऽम्बुदान्मत्तान्यथेन्द्रः समुपस्थितान्॥ १॥
मोत्तिष्ठतेति तान्सर्वानवोचदसुराधिपः।
मघापञ्चकमासाद्य भार्गवो ऽम्बुधरानिव॥ २॥
ततो जाम्बूनदे दिव्ये उपविष्टो वरासने।
उद्गच्छन्निव संप्राप्य उदयं तेजसां पतिः॥ ३॥
भाति सिंहासनासीनः स राजा सुरविद्विषाम्।
मेरुशृङ्गमिवासाद्य सबलाको महाम्बुदः॥ ४॥
तस्योपविष्टस्य तदा सर्व एव सुरद्विषः।
जयेति चक्रुरुत्थाय वेदा इव पितामहम्॥ ५॥
स तेषां मध्यगो भाति हिरण्याक्षो ऽसुरेश्वरः।
मध्ये कलभवृन्दानां यथा मत्तो महागजः॥ ६॥

---

**1c** ऽम्बुदान्म° ] म्बदोन्म° $R^{pc}$, म्बदान्म° $R^{ac}$ **1d** °स्थितान् ] °स्थितः R **2a** मोत्तिष्ठ° ] नो-तिष्ठ° R **2b** °नवोचद° ] °नुवाच अ° R **2c** पञ्चक° ] पञ्चम° R **4c** °वासाद्य ] °वादित्यः R **5b** सर्व एव ] व्यास सर्व्वे R **5c** °रुत्थाय ] °रुत्काय R **5d** वेदा इव पितामहम् ] देवा इव शतक्रतुम् R **6a** मध्यगो भाति ] मध्यशो याति R **6b** °क्षो ऽसुरेश्वरः ] °क्षः सुरेश्वरः R

---

**2a** मोत्तिष्ठते° ] मा{सा° $A_7$} तिष्ठंते° **A** **2b** °नवोचद° ] °नुवाच सो **A** **2c** मघा° ] माया° **A** **2d** भार्गवो ऽम्बु° ] ताङ्गी वायु° $A_3$, भाङ्गीराम्ब° $A_7$, सर्वायु° $A_4$ (unmetrical) **2d** °धरानिव ] °धराणि च **A** **3a** जाम्बू° ] $A_3$, जाम्बु° $A_4A_7$ **3b** °विष्टो ] $A_3$, °विष्टे $A_4A_7$ **3cd** ] om. **A** **4a** भाति सिंहासना° ] जा{ज° $A_7$}ति हिंसासमा° **A** **5d** वेदा ] देवा **A**

---

Manuscripts available for this chapter: $S_1$ photos 8.7a (f. 127r), 8.6 (f. 127v), 8.9a (f. 128r) and 8.8b (f. 128v); $S_2$ (upto **1 b**[8]) exposure 110 (f. 117v; after this many folios lost); $S_3$ f. 127r–129r; R f. 147r–149v; $A_3$ f. 85r–86v; $A_4$ f. 121v–124r; $A_7$ f. 120r–121v.
**1**($a^4$)⟨$a^5$–$d^6$⟩($d^7$) $S_1$, ⟨$c^1$–$d^8$→⟩ $S_2$ **2**($a^4$–$a^5$) $S_1$ **6**($c^8$) $S_1$

---

**1b** °दानवान् ] $S_2^{pc}$R**A**Bh, °दानवाः $S_2^{ac}S_3$ **1c** ऽम्बुदान् ] **A**Bh, म्बुदा $S_3$ **1d** °स्थितान् ] $S_3$ **A**Bh, (°स्थि)ता $S_1$ **2–6** ] Bh reads these verses in the order of 5, 2, 6, 3 and 4, conjecturing loss of 3cd. **2a** मोत्तिष्ठ° ] $S_3$Bh (conj.), योतिष्ठ° $S_1$ **2ab** तान्सर्वान° ] em. Bh (silently), तां सर्व्वान° $S_1$, तां सर्वानु° $S_3$ **2c–5b** ] om. $S_1$ **2c** मघा° ] $S_3$R, माया° Bh **2d** भार्गवो ऽम्बु° ] $S_3$R, भोगी वायु° Bh (conj.?) **3a** जाम्बू° ] R$A_3$Bh, जम्बू° $S_3$ • दिव्ये ] $S_3^{pc}$R**A**Bh, देवि $S_3^{ac}$ **3cd** ] ($S_3$)R, Bh conjectures loss of two pādas. **3c** उद्गच्छन्निव ] R, उद्गच्छनिव $S_3$ **3d** °सां पतिः ] R, °साम्पतिं $S_3$ **4a** भाति सिंहासनासीनः ] RBh (conj.?), भाति सिंहासनासीनं $S_3$ **5a** तस्योप° ] $S_3$R**A**, तस्य प्र° Bh (conj.) **5c** चक्रुरु° ] $S_3$R**A**Bh, चकुरु° $S_1$ **5d** °महम् ] $S_3$**A**Bh, °महत् $S_1$ **6a** °षां मध्यगो ] **A**, °षामग्यशो $S_1$, °षां मध्यतो $S_3$, °षामग्रगो Bh (conj.) **6b** °क्षो ऽसुरेश्वरः ] $S_3$**A**, °क्षो महासुरः $S_1$Bh **6d** मत्तो ] $S_3$R**A**Bh, मंगे $S_1$

बभूवुरुपविष्टास्ते तूष्णीमेवासुरास्तदा ।
सिसृक्षवो जलं काले नीलाम्भोदा इवोन्नताः ॥ ७ ॥
सनत्कुमार उवाच ।
स तेषामिङ्गितं ज्ञात्वा कालं च सुरतापनः ।
हिरण्याक्षः स्वयं राजा तानुवाच सुरद्विषः ॥ ८ ॥
यूयं सर्वे महामायाः शृणुध्वं संयताः समम् ।
कालप्राप्तं च पथ्यं च शिष्या इव गुरोर्वचः ॥ ९ ॥
मम भ्राता प्रियो ह्यासीज्ज्येष्ठः पूज्यो यथा पिता ।
हिरण्यकशिपू राजा महात्मा सत्यसंगरः ॥ १० ॥
धार्मिकश्च वदन्यश्च यज्वा दाता तपोन्वितः ।
आहिताग्निश्चतुर्वेदः सर्वभूतसुखावहः ॥ ११ ॥
राज्यार्थे स हतो देवैर्निकृत्या मूढमानसैः ।
तस्य दुःखेन तप्यामि शुष्यामि च महासुराः ।
सलिलादुद्धृतं ग्रीष्मे पद्मं कुसुमितं यथा ॥ १२ ॥

---

**7b** °स्तदा ] °स्ततः R **7d** नीलाम्भोदा ] नीलाम्भोद R **8d** तानु° ] तमु° R **9a** यूयं ] भूयः $R^{pc}$, भूयं $R^{ac}$ **9b** °ताः समम् ] °ता मम R **9c** पथ्यं च ] पश्यन्त R **10a** प्रियो ] पुरा R **11a** वदन्य° ] वदान्य° R **12c** दुःखेन ] खेद R (unmetrical)

---

**7a** °विष्टास्ते ] °विष्टाश्च $A_3A_4$, °विष्टा $A_7$ (unmetrical) **7d** °वोन्नताः ] $A_3A_4$, °वोन्नता $A_7$ **8a** °मिङ्गितं ] $A_3A_4$, °लिङ्गितं $A_7$ **8b** कालं च ] $A_7$, कांचनं च $A_3A_4$ (unmetrical) **9a** °मायाः ] °मायां **A** **9b** °ताः समम् ] °ता मम **A** **10ab** °सीज्ज्येष्ठः ] $A_3$, °सीज्ज्येष्टः $A_4$, °सीह्येष्ठः $A_7$ **10b** पूज्यो ] $A_3A_4$, पुत्रो $A_7$ **11a** वदन्य° ] वदान्य° **A** **11d** °भूतसुखावहः ] $A_3$, °भूतासुखा-वहः $A_4$, °भूतः शुखावह $A_7$ **12b** मूढमानसैः ] मूलमानसः $A_3A_4$, मूलमासनः $A_7$ **12c** दुःखेन ] खेदे थ $A_3A_4$, खेद थ $A_7$ • तप्यामि ] $A_3A_7$, तप्यासि $A_4$ **12d** शुष्यामि च ] तत्कुरुष्व **A** **12e** °दुद्धृतं ] °दुत्थितं $A_3A_4$, °दुष्कृतं $A_7$ **12f** कुसुमितं ] $A_3A_4$, कुशुमितं $A_7$

---

**7**$(a^5)\langle a^6–d^7\rangle$ $S_1$ **9**$(c^7)$ $S_1$ **10**$(a^6)\langle a^7–d^5\rangle(d^6)$ $S_1$ **11**$\langle d^7–d^8\rangle$ $S_3$ **12**$(f^2, f^6)$ $S_1$, $(a^1–a^3)$ $S_3$

---

**7a** °विष्टास्ते ] $S_3$R, °विष्टाश्च Bh **7c** जलं काले ] R**A**Bh, जल कालं ⟨काले⟩ $S_3$ (unmetrical) **7d** नीलाम्भोदा ] **A**Bh, नीलाम्भोद $S_3$ • °वोन्नताः ] R$A_3A_4$Bh, ···ताः $S_1$, °वोन्नता $S_3$ **8a** तेषामिङ्गितं ] $S_3$R$A_3A_4$, तेषामिंशतं $S_1$, तेषांमिङ्गितं Bh (typo) **8c** हिरण्याक्षः स्वयं ] $S_1$R**A**Bh, हिरंण्याक्ष स्वय $S_3$ **9a** °मायाः ] RBh (em.?), °माया $S_1S_3$ **9d** °र्वचः ] $S_3$R**A**Bh, °र्वच $S_1$ **10ab** ह्यासीज्ज्येष्ठः ] R$A_3$Bh, ह्याषीज्येष्टः $S_3$ **10d** °संगरः ] $S_1$R**A**Bh, °सङ्गताः $S_3$ **11a** वद-न्य° ] $S_3$, तदन्य° $S_1$, वदान्य° Bh **11b** यज्वा ] $S_3$R**A**Bh, यज्ञा $S_1$ • तपोन्वितः ] $S_3$R**A**Bh, तपोन्विताः $S_1$ **11c** °र्वेदः ] $S_3$R**A**Bh, °र्वेद $S_1$ **11d** °वहः ] $S_1^{pc}$R$A_3A_4$Bh, °वह $S_1^{ac}$ **12ab** देवैर्नि° ] R**A**, देवै नि° $S_1S_3$, देवैर्वि° Bh (conj.?) **12c** तप्यामि ] $S_1$R$A_3A_7$Bh, चाद्यापि $S_3$ **12d** शुष्यामि च ] $S_1$RBh, शुश्यामिव $S_3$ • महासुराः ] $S_3$R**A**Bh, महासुरा $S_1$ **12e** °दुद्धृतं ] $S_1$RBh, °दुद्धृत $S_3$ **12f** पद्मं कुसुमितं ] $S_1$R$A_3A_4$Bh, पद्म कुसुमित $S_3$ (unmetrical)

तेषां कर्तुमहं दण्डं शक्तो ऽस्म्यसुरविद्विषाम् ।
भवतां तत्र बालानां रक्षार्थं नोद्यमाम्यहम् ॥ १३ ॥
सो ऽहं दण्डं स्वयं कर्तुमेकाक्यसुरविद्विषाम् ।
गमिष्यामि न संदेहो मा भीर्भवतु वो ऽसुराः ॥ १४ ॥
सनत्कुमार उवाच ।
तस्य तद्वचनं श्रुत्वा दानवास्ते मुदान्विताः ।
परस्परमवेक्षन्त व्रीडया परयान्विताः ॥ १५ ॥
विप्रचित्तिस्तदनुजो भ्रातरं तं महाबलम् ।
उवाच प्रणतः सम्यगर्थवन्मधुरं वचः ॥ १६ ॥
न संदेहो हताः सर्वे त्वयैकेनासुरद्विषः ।
यदि युद्धेन तिष्ठन्ति मायां कांचिदनाश्रिताः ॥ १७ ॥
अबलास्ते न संदेहो निकृत्या बलिनस्तु ते ।
प्रसादयित्वा शिरसा यद्ब्रवीमि निबोध तत् ॥ १८ ॥

---

**13b** शक्तो ऽस्म्यसुरवि॰ ] स शक्रो स्त्यसुर॰ R **14b** ॰मेकाक्यसुरवि॰ ] ॰मभिकांक्षे सुर॰ R **15cd** ] om. R **16d** ॰गर्थवन्म॰ ] ॰ग्गन्धवन्म॰ R **17b** त्वयैकेना॰ ] त्वयेनेके R **17c** युद्धेन तिष्ठन्ति ] युद्धे च तिष्ठन्ते R **17d** कांचिद॰ ] काश्चिद॰ R **18c** प्रसादयित्वा शिरसा ] प्रसाद्य शिरसा तम्वै R **18d** निबोध तत् ] निबोधतः R

---

**13a** कर्तुमहं दण्डं ] $A_3$, कर्तुंमहं दंडं $A_4$, कर्तुमहं दिव्या $A_7$ **13b** शक्तो ऽस्म्य॰ ] शक्तो स्मा॰ $A_3A_4$, शक्रो स्मा॰ $A_7$ **13c–14b** ] om. $A_7$ **13c** भवतां तत्र ] भवतं ते त्र $A_3A_4$ **13d** नोद्यमा॰ ] नाद्यमा॰ $A_3A_4$ **14b** ॰र्तुमेकाक्य॰ ] ॰र्तुं स्वमेवा॰ $A_3A_4$ • ॰विद्विषाम् ] $A_4$, ॰विद्विषा $A_3$ **14cd** ] om. **A** **16d** ॰गर्थवन्मधुरं वचः ] ॰क् सर्वशत्रुपुरंदरः $A_3A_4$, ॰क् शर्वशक्रसुबन्धवः $A_7$ **17a** न संदेहो हताः सर्वे ] सस्नेहं तव सर्वे वै $A_3A_4$, सस्नेह तान्त सर्वे वै $A_7$ **17d** कांचिद॰ ] $A_3A_4$, काञ्चिद्द॰ $A_7$ **18a** अबलास्ते ] $A_3A_4$, अबनास्ते $A_7$

---

**13**$(a^1)\langle a^2–b^7\rangle(b^8, c^3)$ $S_1$ **14**$(a^6)\langle b^5–b^8\rangle(c^1)$ $S_3$ **15**$(c^6)\langle c^7\rangle(c^8)$ $S_1$ **16**$(b^3, b^8)$ $S_1$

---

**13a** तेषां ] R**A**Bh, (त)⏑̱ $S_1$ (upper part lost), तेषा $S_3$ • कर्तुमहं दण्डं ] R$A_3$Bh, कर्तुम्महादण्ड $S_3$ **13c** तत्र ] $S_1$RBh, त्वत्र $S_3$ **13d** रक्षार्थं ] $S_1$R**A**Bh, रक्षार्थ $S_3$ • नोद्यमाम्यहम् ] $S_3$R, नोद्यताम्यहं $S_1$, नोद्यतो ह्यहम् Bh (conj.) **14a** स्वयं ] $S_1$R$A_3A_4$Bh, स्व(य) $S_3^{pc}$ (unmetrical), स्व(स्व) $S_3^{ac}$ **14b** ॰मेकाक्य॰ ] $S_1S_3^{pc}$Bh, ॰मेका(ज्य॰) $S_3^{ac}$ **14c** गमिष्यामि ] $S_3$RBh (em.?), गमिश्यामि $S_1$ **14d** भीर् ] $S_3$RBh (em.?), भी $S_1$ **15b** दानवास्ते ] $S_3$R**A**Bh, दानवाति $S_1$ • ॰दान्विताः ] R**A**Bh, ॰दान्विता $S_1S_3$ **15c** ॰मवेक्षन्त ] $S_3$**A**, ॰मु(पे)⏑̱(न्त) $S_1$, ॰मुदैक्षन्त Bh (conj.?) **15d** ॰यान्विताः ] **A**Bh, ॰यान्विता $S_1S_3$ **16a** ॰चित्तिस्त॰ ] $S_3$R**A**Bh, ॰चित्तिं त॰ $S_1$ **16b** भ्रातरं तं ] $S_1$R**A**Bh, भ्रातरन्त $S_3$ • महाबलम् ] $S_3$R**A**, महाब(लः) $S_1$, महाबलः Bh **16cd** सम्यग॰ ] $S_3$Bh, संम्यग॰ $S_1$ **16d** ॰रं वचः ] RBh (em.?), ॰रं वच $S_1$, ॰रम्वच $S_3$ **17a** हताः सर्वे ] R, महा सर्व्वे $S_1$, हता सर्वे $S_3$, महासत्त्व Bh (conj.?) **17b** After this Bh conjectures loss of two pādas. **17d** मायां कांचिदना॰ ] $A_3A_4$, माया काञ्चि विना $S_1$, मयाङ्किञ्चिदना॰ $S_3$, मायां काञ्चिद्विना॰ Bh (em.?) **18a** अबलास्ते ] $S_3$R$A_3A_4$Bh, अबलान्ते $S_1$ **18c** प्रसादयित्वा ] $S_1$**A**Bh, प्रसादये त्वां $S_3$ **18d** निबोध तत् ] $S_3$**A**Bh, निबोधतः $S_1$

बालैरपि हि यत्प्रोक्तमुपपत्त्या प्रसाधितम्।
तद्ग्राह्यमिति वेधोभिः शास्त्रविद्भिः समीरितम्॥ १९॥
हिरण्यकशिपू राजा भ्राता नो ज्येष्ठ उत्तमः।
सो ऽपि शक्तो ऽहमित्येव एकाकी देवतैर्हतः॥ २०॥
महाबलो ऽपि बहुभिरशक्तैर्हन्यते बलात्।
आक्रन्दं हि विना राजन्नतो विज्ञापयामि ते॥ २१॥
भवतस्तु वयं बाला न तेषामसुरेश्वर।
शक्ता वयं सुयुद्धेन तान्हन्तुं कुलपांसनान्॥ २२॥
तपोयोगबलोपेता मायाभिश्च समन्विताः।
अनुस्मरन्तो वैरं च वयं हंस्याम देवतान्॥ २३॥
यथा तव न निद्रास्ति हिरण्यकशिपोर्वधात्।
तथास्माकं महाराज मा नो बालान्यथा चर॥ २४॥

---

**19c** तद्ग्राह्यमिति वेधोभिः ] तद्ग्राह्यं वेदविद्भिश्च R **20b** भ्राता ] त्राता R • ज्येष्ठ ] ह्येष्ट R **20d** देवतै° ] दैवतै° R **21b** °शक्तैर्हन्यते बलात् ] °शक्ता{°क्तो $R^{ac}$}वपि हन्यते R **21c** आक्रन्दं ] आ-क्रन्द R **21cd** राजन्नतो ] राजन्नते R **22b** °सुरेश्वर ] $R^{pc}$, °सुरेश्वरः $R^{ac}$ **22c** वयं सु° ] वयन्तु R **22d** तान्हन्तुं ] तत्तूर्णं R • °पांसनान् ] पांसनम् R **23c** अनुस्मरन्तो ] अनुस्वारन्तो R **23d** हंस्याम देवतान् ] हिंस्याम दैवतान् R **24a** न निद्रा° ] विनिद्रा° R **24b** °र्वधात् ] °र्वधे R **24c** मा नो ] $R^{ac}$, मा न $R^{pc}$ • °न्यथा चर ] °नवैहि ते R

---

**19a** बालैरपि ] $A_4$, बलैरपि $A_3A_7$ **19ab** °क्तमुपपत्त्या ] °क्तं तपसाद्य **A** **19cd** ] om. $A_3A_4$, तद्ग्राह्यं वेदविद्भिस्तु शास्त्रविद्भि समीरितम् $A_7$ **20b** भ्राता नो ] भ्रातरो $A_3A_4$, भ्राता वा $A_7$ • ज्येष्ठ ] $A_4$, ज्येष्ट $A_3$, श्रेष्ठ $A_7$ **20c** ऽहमित्येव ] चाहमिव **A** **20d** देवतै° ] दैवतै° **A** **21cd** ] om. $A_7$ • आक्रन्दं हि विना राजन्नतो ] आकंदर्णिर्विना राजन् वाता $A_3$, आकंदगर्विना राजानता $A_4$ **22a** भवतस्तु ] $A_7$, भरतस्तु $A_3A_4$ **22b** °सुरेश्वर ] °सुरेश्वरः **A** **22d** तान्हन्तुं ] $A_3A_7$, तां हन्तु $A_4$ • कुलपांसनान् ] कुलपांशनान् $A_4A_7$, कुलापांशनात् $A_3$ **23d** हंस्याम देवतान् ] हिंस्याम दैवतान् **A** **24a** तव न निद्रास्ति ] भवन्नमित्रास्ते $A_3A_4$, भवत्वमिस्रास्ते $A_7$ **24b** °पोर्वधात् ] °पोर्बलात् $A_3A_7$, °पोबर्लात् $A_4$ **24d** मा नो बालान्यथा चर ] माला{°ल° $A_4$}वान् दानवैर्विभो **A**

---

**20**($d^3$) $S_1$ **22**($c^5$–$c^7$)⟨$c^8$⟩($d^1$–$d^4$) $S_1$ **23**($b^5$, $b^7$) $S_1$

---

**19a** बालैरपि ] $S_3RA_4Bh$ (conj.), बलेरपि $S_1$ **19ab** हि यत्प्रोक्तमुप° ] $S_3R$, हिरत्प्रोक्तमुप° $S_1$, हिरण्याक्ष सूप° Bh (conj.?) **19b** °साधितम् ] RABh, °सादितं $S_1$, °साधिकं $S_3$ **19c** °मिति वेधोभिः ] em., °मि वेदोति $S_1$ (unmetrical), °मिति वेधौभिः $S_3$, °मिति – – – Bh **19d** शास्त्रवि-द्भिः ] RBh (em.?), शास्त्रविद्भि $S_1S_3$ **20b** भ्राता ] $S_1A_7Bh$, भ्रात $S_3$ • ज्येष्ठ ] $S_1A_4Bh$, ज्येष्ट $S_3$ **20d** देवतै° ] $S_1S_3$, दैवतै° Bh **21ab** बहुभिरशक्तैर् ] $S_3$**A**, बहुभिःरशक्तै $S_1$, च हरिरशक्तैर् Bh (conj.?) **21c** आक्रन्दं हि ] em., आक्रन्द हि $S_3$, आक्रन्दन्तं $S_1Bh$ **21cd** राजन्नतो ] $S_1Bh$, राजनतो $S_3$ **22a** °तस्तु वयं ] RABh, °तस्तू पयं $S_1$, °तस्तु वय $S_3$ (unmetrical) **22b** °सुरेश्व-र ] $R^{pc}Bh$ (em.?), °सुरेश्वरः $S_1S_3$ **22d** तान्हन्तुं ] $S_3A_3A_7Bh$, ⏑⏑ा(हंर्त्तु) $S_1$ • °पांसनान् ] em. Bh (silently), °पांसनः $S_1$, °पान्सनात् $S_3$ **23b** समन्विताः ] RABh, समन्विता $S_1S_3$ **23c** वैरं च ] $S_3RABh$, वैराश्च $S_1$ **23d** देवतान् ] $S_1S_3$, दैवतान् Bh **24a** निद्रास्ति ] $S_1RBh$, निन्द्रास्ति $S_3$ **24b** °र्वधात् ] $S_3Bh$ (em.?), °र्व्वधान् $S_1$ **24c** °थास्माकं ] $S_1RABh$, °थास्माक $S_3$

यत्र नो योक्ष्यसे राजन्समे वा विषमे ऽपि वा।
तरिष्यामो वयं तद्वै महामत्स्य इवार्णवम्॥ २५॥
प्रह्लादो ऽयं सहभ्राता ससुतः ससुहृज्जनः।
एक एवाह्वयेत्सर्वान्यथा सिंहो महाद्विपान्॥ २६॥
बलिरेष च दैत्येन्द्र एक एव शरीरवान्।
सुरान्सयमवित्तेशाञ्छक्तः सर्वान्प्रबाधितुम्॥ २७॥
अयं बाणश्च तत्पुत्रो राजा बाहुसहस्रधृक्।
एक एव सुरान्सर्वान्विनाशयितुमुद्यतः॥ २८॥
कालनेमिर्महेष्वासो दनुपुत्रः प्रतापवान्।
एक एव सुरान्सर्वान्विनाशयितुमुद्यतः॥ २९॥
इमौ सुन्दनिसुन्दौ च भ्रातरौ बाहुशालिनौ।
उभावेकाकिनौ युद्धे देवान्हन्तुं समुद्यतौ॥ ३०॥
अयं मयश्च विक्रान्तस्तारकस्तार एव च।
अन्ये च दानवाः शूराः शक्ता देवान्प्रबाधितुम्॥ ३१॥

---

**25a** नो योक्ष्यसे ] त्वां यास्यसे R **25b** ॰न्समे ] ॰न्ममै॰ R **25c** तरिष्यामो ] भविष्यामो R • वयं तद्वै ] वयञ्चैव R **25d** महामत्स्य ] $R^{pc}$, महामत्स्यो $R^{ac}$ **26a** प्रह्लादो ऽयं ] प्रसादो पि R **26b** ससुतः ] सामात्यः R • ससुहृज्जनः ] +स+सुहृज्ञनः R **26c** ॰वाह्वयेत् ] ॰वाभूयेत् R **27b** शरीरवान् ] महाबलः R **27c** ॰रान्सयम॰ ] ॰रानपि॰ R (unmetrical) **28a** अयं बाणश्च ] स्वयं बालश्च R **28c** एव सुरान् ] एवासुरान् R **28d** ॰न्विनाशयि॰ ] ॰न् स नाशयि॰ R **31a** अयं मयश्च ] स्वयं मेघश्च R **31ab** ॰न्तस्तारकस्तार ] ॰न्तः प्रभुस्तावेक R

---

**25a** नो योक्ष्यसे ] त्वं योत्स्यसे **A** **25b** ॰न्समे ] ॰न् मामे॰ $A_3$, ॰न् सामे $A_4A_7$ • ऽपि वा ] पि व $A_4$, पि च $A_3A_7$ **25c** तरिष्यामो वयं तद्वै ] चरिष्यामो वलं चैव **A** **25d** महामत्स्य ] महामत्स्या **A** • इवार्णवम् ] $A_3A_4$, इवार्ण्णव $A_7$ **26a** ॰भ्राता ] $A_7$, भ्रात्रा $A_3A_4$ **26b** ससुतः ] संवृतः **A** **26cd–28** ] om. **A** **29a** ॰र्महेष्वासो ] $A_3A_4$, ॰र्म्महेश्वासो $A_7$ **29d** ॰मुद्यतः ] $A_3$, ॰मुद्यताः $A_4A_7$ **30b** च ] तु **A** **31a** मयश्च ] मयः स **A** **31ab** ॰न्तस्तारकस्तार ] ॰न्तः प्रभुस्तारक **A** **31d** ॰बाधितुम् ] ॰साधितुम् **A**

---

**25**($d^1$–$d^8$) $S_1$ **26**($c^2$–$c^7$)⟨$c^8$⟩$S_1$

---

**25a** योक्ष्यसे ] $S_3$Bh (em.?), योक्षसे $S_1$ **25c** वयं तद्वै ] $S_3$Bh (em.?), वयंन्तद्वै $S_1$ **25d** महामत्स्य ] $S_1R^{pc}$ (upper parts lost in $S_1$), महात्मस्य $S_3$, बालमत्स्या Bh (conj.?) • इवार्णवम् ] $S_1$R$A_3A_4$Bh, इवार्ण्णवे $S_3$ **26a** प्रह्लादो ] $S_1^{pc}$**A**, प्रह्रादो $S_1^{ac}S_3$Bh • ऽयं ] $S_1$**A**Bh, य $S_3$ **26b** ससुतः ] $S_3$Bh (em.?), ससुत $S_1$ (unmetrical) • ॰सुहृज्जनः ] $S_1^{pc}S_3$**A**Bh, ॰सुहृजनः $S_1^{ac}$ (unmetrical) **26c** ॰वाह्वयेत् ] $S_1$Bh, ॰वाह्वये $S_3$ **26d** ॰न्यथा ] $S_1$RBh, ॰न्यया $S_3$ • ॰द्विपान् ] $S_1^{pc}S_3$RBh, ॰द्विषान् $S_1^{ac}$ **27a** दैत्येन्द्र ] $S_1$RBh, चैत्येन्द्र $S_3$ **27b** शरीरवान् ] $S_1S_3$, सवासवान् Bh (conj.) **27c** ॰न्सयम॰ ] $S_3$Bh (conj.), ॰न्समय॰ $S_1$ **27cd** ॰शाञ्छक्तः सर्वान्प्र॰ ] RBh (conj.?), ॰शां च्छक्तन्सर्व्वोत्प्र॰ $S_1$, ॰षां{॰शां $S_3^{ac}$} शक्तः सर्वा प्र॰ $S_3$ **28a** बाणश्च ] $S_3$Bh (conj.), मानश्च $S_1$ • तत्पुत्रो ] $S_1$RBh, तत्पौत्रो $S_3$ **28c** सुरान् ] $S_1$RBh, सुरा $S_3$ **29** ] om. $S_1$Bh **29a** ॰नेमिर्महेष्वासो ] R$A_3A_4$, ॰नेमि महेश्वासो $S_3$ **29c** सुरान् ] R**A**, सुरा $S_3$ **30a** इमौ ] $S_3$R**A**Bh, इमो $S_1$ **30b** ॰शालिनौ ] $S_3$R**A**Bh, ॰शाडिनौ $S_1$ **31a** अयं मयश्च ] $S_1^{pc}S_3$Bh, अयम्मयश्चं $S_1^{ac}$ **31ab** ॰न्तस्तारक॰ ] $S_3$, ॰न्तसारक॰ $S_1$, ॰न्तः सारक॰ Bh (em.?) **31c** दानवाः ] R**A**Bh, दानवा $S_1S_3$ • शूराः ] $S_3$R**A**Bh, शूरा $S_1$ **31d** शक्ता ] $S_3$R**A**Bh, शक्तां $S_1$ • देवान् ] $S_1$R**A**Bh, देवा $S_3$

एते ऽप्यतिबलाः सर्वे बलवन्तो वयं सदा।
वधिष्यामः सुरान्सर्वान्व्याधा इव मृगान्वने॥ ३२॥
शूरो ऽयमन्धकः श्रीमान्ब्रह्मदत्तवरस्तथा।
प्रसह्य सर्वांस्तान्युद्धे नेष्यते वै यमालयम्॥ ३३॥
एवमेनं समाश्रित्य पालितानेन चैव हि।
करिष्यामो महद्युद्धं देवतानां भयंकरम्॥ ३४॥
पूर्वदेवा वयं सर्वे पश्चात्ते देवताभवन्।
कथं बिभेम तेषां वै सिंहानां शरभा इव॥ ३५॥
सनत्कुमार उवाच।
तस्य तद्वचनं श्रुत्वा अन्धकः सो ऽसुरेश्वरः।
उवाच वचनं तत्र हर्षयन्दानवेश्वरान्॥ ३६॥
महाबला वयं राजन्बलहीनाः सुराश्च ते।
पश्यध्वं देवतान्सर्वान्हतान्यमपुरोगमान्॥ ३७॥
अद्य तं राजहन्तारं दुरात्मानं कुलाधमम्।
मयैकेन हतं पश्य आदित्यानां कनीयसम्॥ ३८॥

---

**32a** ऽप्यतिबलाः ] चाप्यबलाः R **32d** ॰न्वने ] ॰न् मुने R **33a** शूरो ] पुत्रो R **33b** ॰स्तथा ] ॰स्तव R **35c** बिभेम ] बिभेमि R **35d** शरभा ] सरभा R **36b** अन्धकः सो ] अन्धको प्य॰ R **36d** ॰वेश्वरान् ] ॰वेश्वरम् R **37c** देवतान् ] दैवतान् R **37d** ॰न्यम॰ ] ॰न् मम R **38b** कुलाधमम् ] दुराधमम् R

---

**32a** ऽप्यति॰ ] $A_7$, त्यति॰ $A_3A_4$ **32c** वधिष्यामः ] $A_7$, वधिष्याम $A_3A_4$ **33b** ॰स्तथा ] ॰स्तव **A** **33c** प्रसह्य ] प्रहस्य **A** • सर्वांस्तान्युद्धे ] सर्वान् यु{सु॰ $A_3$}द्धेन **A** **34a** एवमेनं ] एवंमेतां $A_3$, एवं सेनां $A_4A_7$ **35c** बिभेम ते॰ ] बिभेमस्ते॰ **A** **35d** शरभा ] सरभा **A** **36** सनत्कुमार उवाच ] om. **A** **36b** अन्धकः ] $A_3A_7$, ऽंधकः $A_4$ (unmetrical) • सो ऽसुरेश्वरः ] सो ऽसुरोत्तमः $A_3A_4$, सासुरोत्तमः $A_7$ **36d** ॰वेश्वरान् ] $A_4A_7$, ॰वोत्तमान् $A_3$ **37c** पश्यध्वं ] पर्यध्वं **A** **37d** ॰न्हतान् ] ॰न् हता **A** **38b** कुलाधमम् ] दुराधमम् **A** **38c–39b** ] om. **A**

---

**32**($a^4$, $d^4$–$d^5$) $S_1$ **35**($c^4$)⟨$d^4$–$d^8$→⟩ $S_1$ **36**⟨←speaker indication–$a^6$⟩($a^7$) $S_1$ **38**($b^3$–$b^4$)⟨←$c^1$–$c^2$⟩($c^3$) $S_1$

---

**32a** ऽप्यति॰ ] $S_1^{ac}S_3A_7$Bh, प्रति॰ $S_1^{pc}$ • ॰बलाः ] R**A**Bh, ॰बला $S_1S_3$ **32b** बलवन्तो ] $S_1$R**A**Bh, बलन्तो $S_3$ (unmetrical) **32c** वधिष्यामः ] $S_3RA_7$Bh, वधिश्याम $S_1$ • सुरान्सर्वान् ] $S_1$R**A**Bh, सुरा सर्वा $S_3$ **33b** ॰स्तथा ] $S_3$, ॰स्तदा $S_1$Bh **33c** सर्वांस्तान् ] $S_3$RBh (em.?), सर्वास्तां $S_1$ **34a** एवमेनं ] $S_1^{pc}S_3$RBh, एवंमेनं $S_1^{ac}$ • समाश्रित्य ] $S_3$R**A**Bh, समाशृत्य $S_1$ **34c** करिष्यामो ] $S_1$R**A**Bh, करिष्याम $S_3$ **35a** पूर्वदेवा ] $S_1$R**A**, सर्वदेवा $S_3$, पूर्वं देवा Bh (em.?) **35b** पश्चात्ते ] $S_3$R**A**Bh, पश्चातै $S_1$ • देवता॰ ] $S_1$R**A**Bh, दैवता॰ $S_3$ • ॰भवन् ] $S_3$R**A**Bh, ॰भवत् $S_1$ **35c** बिभेम ते॰ ] $S_1S_3$, बिभीम ते॰ Bh (conj.?) **35d** सिंहानां ] $S_1$R**A**Bh, सिङ्हाना $S_3$ **36** सनत्कुमार उवाच ] $S_3$R (सन उ in $S_3$), om. Bh **36b** अन्धकः सो ] $S_3A_3$Bh, दन्धकस्सो{॰स्यो $S_1^{ac}$} $S_1$ **37a** राजन् ] $S_3$R**A**Bh, राजां $S_1$ **37b** ॰हीनाः ] R**A**Bh, ॰हीनां $S_1$, ॰हीना $S_3$ • सुराश्च ] $S_1S_3$R**A**, सुरास्तु Bh (conj.?) **37c** पश्यध्वं ] $S_1S_3$R, पश्य त्वं Bh (conj.?) • देवतान् ] $S_1S_3$**A**, दैवतान् Bh (em.?) **37d** ॰पुरोगमान् ] $S_3$R**A**Bh, ॰सुरोगमां $S_1$ **38b** दुरात्मानं ] R**A**Bh, दूरा(त्मानं) $S_1$, दुरात्मान $S_3$ **38cd** ] $S_1$ and Bh have this before 40. **38d** कनीयसम् ] $S_3$RBh (em.?), कनीयसां $S_1$

अद्य मातादितिस्तेषां दुःखक्लिन्नाश्रुलोचना।
जलं दास्यति सर्वेषां यमस्य पुरवासिनाम्॥ ३९ ॥
तिष्ठध्वं दानवाः सर्वे पर्याप्तो ऽहं दुरात्मनाम्।
अस्माकं राज्यहन्तॄणां मृत्युरस्मि समागतः॥ ४०॥
सनत्कुमार उवाच।
तस्य तद्वचनं श्रुत्वा हिरण्याक्षः प्रतापवान्।
उवाच दानवान्व्यास जयेप्सुरसुराधिपः॥ ४१॥
अद्य पुष्यश्च नक्षत्रमस्माकं बलकारकम्।
अद्यैव दंशिताः सर्वे द्रुतं निर्यात दानवाः॥ ४२॥
अथ ते दानवाः शीघ्रं वाहनानि मुदा युताः।
प्रोत्सारयन्त संग्रामे योग्यानि रिपुबाधने॥ ४३॥
शीघ्रं कुरुध्वं सज्जानि गच्छामो देवतान्प्रति।
– – – – – – – – – – – – – – – – –॥ ४४॥
तेषां स तुमुलः शब्दो वाहनानां बभूव ह।
मन्दरेणेव भिन्नस्य क्षीरोदस्य पुरा महान्॥ ४५ ॥

---

**39b** क्लिन्ना° ] क्रिन्ना° R **40a** तिष्ठध्वं ] तिष्ठन्तु R **40c** °हन्तॄणां ] °हन्तृणां R **40d** °रस्मि समागतः ] °रश्मि समासतः R **42a** पुष्यश्च ] पूय्यश्च R **42d** निर्यात ] निर्यातु R **43c** प्रोत्सा-रयन्त ] प्रोत्सारयन्तः R **44b** देवतान् ] दैवतान् R **44cd** ] om. R **45a** स तुमुलः ] सुतुमुलः R

---

**39c** जलं दास्यति ] यं दास्यामि च $A_3$, यदाप्स्यामि च $A_4$, जां दास्यामिं $A_7$ (unmetrical) **39d** °वासिनाम् ] °वासिनीं $A_3A_7$, °वासिनौ $A_4$ **40c** अस्माकं ] युष्माकं **A** **40c** °हन्तॄणां ] $A_3A_4$, °हर्तृणां $A_7$ **40d** समागतः ] $A_4$, समागमः $A_3$, समागमाः $A_7$ **42a** पुष्यश्च ] $A_4A_7$, पुष्य च $A_3$ **42b** °कारकम् ] °कारणं **A** **42d** द्रुतं निर्यात ] द्रुता निर्यांतु **A** **43c** प्रोत्सारयन्त ] प्रोक्षावयंतु $A_3$, प्रेक्षावयंतु $A_4$, प्रोक्षारयन्तु $A_7$ **44b** देवतान् ] दानवान् **A** **44cd** ] om. **A** **45a** स तुमुलः ] $A_7$, संतुमुलः $A_4$, सुतुमुलः $A_3$ **45c** मन्दरेणेव भिन्नस्य ] मन्दवातप्रेरितस्य **A** **45d** पुरा ] स्वनो $A_3A_4$, स्वलो $A_7$

---

**39**(b³)⟨b⁴–d⁸→⟩ $S_1$ **41**⟨b⁷, d⁵–d⁸→⟩$S_1$ **42**⟨←a¹–d¹⟩(d²) $S_1$ **45**(a⁷, c²)⟨c³–d⁸→⟩$S_1$

---

**39b** °क्लिन्नाश्रुलोचना ] em., °क्लिनाश्रुलोचना $S_3$ (unmetrical), ि꣫ ··· $S_1$, ि–––––– Bh **39cd** ] $S_3$R, –––––––––––––––––– Bh • After this $S_1$ and Bh have 38cd. **40a** दानवाः ] R**A**Bh, दानवा $S_1S_3$ **40b** ऽहं ] $S_3$R**A**Bh, ह $S_1$ **40c** राज्य° ] $S_3$R**A**, राज° $S_1$Bh **40c** °हन्तॄणां ] $A_3A_4$Bh, °हंतृणां $S_1$, °हन्त्रीणां $S_3$ **40d** समागतः ] $S_3A_4$Bh (conj.?), समागमः $S_1$ **41b** हिरण्याक्षः ] $S_1$R**A**Bh, हिरण्याक्षं $S_3^{pc}$, हिरण्याक्ष्य $S_3^{ac}$ • प्रतापवान् ] $S_3^{pc}$R**A**Bh, प्रता˘वान् $S_1$, प्रतावान $S_3^{ac}$ (unmetrical) **41d** °प्सुरसुराधिपः ] $S_3$R**A**, °प्सु सु ··· $S_1$, °प्सुः सुरविद्विषाम् Bh (conj.?) **42a** पुष्यश्च ] $S_3A_4A_7$, पुष्यं च Bh (em.?) **42b** बलकारकम् ] R, चैव कारकं $S_3$, बलकारणम् Bh **42c** अद्यैव दंशिताः ] R**A**Bh, अद्येव{°वं $S_3^{ac}$} दंशिता $S_3$ **43a** दानवाः ] R**A**Bh, दानवा $S_1S_3$ **43b** युताः ] $S_1^{pc}$R**A**Bh, युता $S_1^{ac}S_3$ **43c** प्रोत्सार° ] R, प्रावार° $S_1$Bh, प्रोक्तार° $S_3$ **43d** रिपु° ] $S_3$R**A**Bh, ऋपु° $S_1$ **44a** सज्जानि ] $S_1$R**A**Bh, सज्जाति $S_3$ **44b** देवतान्प्रति ] $S_3$, दैवतां प्रतिं $S_1$, दैवतान्प्रति Bh (em.?) **44cd** ] Loss of two pādas conjectured, om. $S_1S_3$Bh **45a** स तुमुलः ] $S_1S_3A_7$, सुतुमुलः Bh **45b** वाहनानां ] $S_3$R**A**Bh, साहनानां $S_1$ **45c** मन्दरेणेव भिन्नस्य ] R, म(न्द)··· $S_1$, मन्दरेणैव भिन्नस्य $S_3$, मन्दवातप्रेरितस्य Bh **45d** पुरा महान् ] R, पुरान्महान् $S_3$, स्वनो यथा Bh (conj.?)

ममाश्वस्तव सिंहो ऽयं ममायं गजयूथपः।
रथो ऽयं कस्य सम्पन्नो युद्धोपकरणैर्भृशम्॥ ४६॥
एहि निर्याहि वेगेन मुहूर्तं प्रतिपालय।
निर्यान्तु सर्वे दैत्येन्द्रा यास्यामः पृष्ठतो वयम्॥ ४७॥
आरोहस्व रथं शीघ्रं किं रथेन ममाद्य वै।
पदातिरेव संग्रामे हंस्याम्यद्यासुरद्विषः॥ ४८॥
एवं तेषामभूच्छब्दः सुमनोज्ञः सुरद्विषाम्।
वंशवीणाखगोन्मिश्रः प्रलाप इव योषिताम्॥ ४९॥
अथ शुक्रस्तदाभ्येत्य भृगोः पुत्रो महातपाः।
हिरण्याक्षमुवाचेदं हर्षयन्दानवेश्वरम्॥ ५०॥
महाशान्तिः कृता ते ऽद्य रक्षा च सह दानवैः।
जहि सर्वान्सुरान्युद्धे न तवास्ति पराजयः॥ ५१॥

---

**46a** ममाश्वस्तव ] ममाश्वशुर R **46b** ममायं ] तवायं R **47b** ◦पालय ] ◦पालयन् R **47c** सर्वे ] सर्व्वे◦ R **48d** हंस्याम्यद्या◦ ] सिंहस्यात्य◦ R **49c** ◦खगोन्मिश्रः ] ◦रवोन्मिश्रः R **50a** ◦स्तदा◦ ] ◦स्तथा◦ R **51a** महाशान्तिः ] मया शान्ति R

---

**46a** ममाश्व◦ ] ममास्व◦ $A_3A_4$, समाश्म◦ $A_7$ **46c** सम्पन्नो ] युद्धे वै **A** **46d** ◦करणैर् ] ◦करणे **A** **47b** मुहूर्तं ] $A_3A_4$, मुहुर्त्तं $A_7$ • ◦पालय ] ◦पालयन् **A** **47c** सर्वे ] सर्व◦ **A** **47d** पृष्ठतो ] $A_7$, पृष्टतो $A_3A_4$ **48b** ममाद्य ] मयाद्य **A** **48d** हंस्याम्यद्या◦ ] हिंस्याम्याद्या◦ $A_3$, हिंसाम्याद्या◦ $A_4$, हिंसाष्यद्याः $A_7$ **49a** एवं तेषा◦ ] एवमेषा◦ **A** **49ab** ◦च्छब्दः सुमनोज्ञः ] ◦त् शब्दस्तुमुलो थ $A_3$, ◦त् शब्दस्तुमलो य $A_4$, ◦त् सब्दः स्तुमणोज्ञ $A_7$ **49c** ◦खगोन्मिश्रः ] ◦रवोन्मिश्रः $A_3$, ◦रवोमिश्रः $A_4$, ◦रवोमीन्द्रः $A_7$ **50a** शुक्रस्तदाभ्येत्य ] $A_4A_7$, शुक्रंस्तदाभेत्य $A_3$ **51a** ◦शान्तिः ] $A_3A_4$, ◦सान्तिः $A_7$ • ते ऽद्य ] तेभ्यो **A** **51b** सह दानवैः ] दानवैः{◦वै $A_7$} सह **A** **51c** सर्वान् ] $A_3A_7$, सर्वा $A_4$

---

**46**⟨←$a^1$–$b^5$⟩($c^3$) $S_1$ **47**($c^1$–$c^2$) $S_1$ **48**($a^8$–$b^1$) $S_1$ **49**⟨$b^6$–$b^8$⟩($c^1$) $S_3$

---

**46a** ममाश्वस्त◦ ] em. Bh (silently), ममाश्व त◦ $S_3$ **47b** मुहूर्तं ] $S_1RA_3A_4Bh$, मुहूर्त्त $S_3$ • ◦पालय ] $S_3Bh$ (conj.?), ◦पालयत् $S_1$ **47d** यास्यामः ] RABh, यास्याम $S_1$, यास्यामो $S_3$ • पृष्ठतो ] $S_1RA_7Bh$, पृष्टतो $S_3$ **48a** आरोहस्व ] $S_1$R**A**, आरुरोह $S_3$, आरोह स्वं Bh (conj.?) • शीघ्रं ] $S_3$R**A**, वी ⏑̲ $S_1$, वीर Bh (conj.?) **48cd** ] om. $S_1$ **48d** हंस्याम्य◦ ] conj. Bh (silently), हंस्याप्य◦ $S_3$ • ◦द्यासुर◦ ] $A_3A_4$, ◦द्य सुर◦ $S_3Bh$ (conj.?) **49a** ◦भूच्छब्दः ] $S_3R$, ◦भूच्छब्दाः $S_1$, ◦मूच्छब्दः Bh (typo, em.?) **49b** सुमनोज्ञः ] RBh (em.?), सुमनोज्ञ $S_1$, समनोज्ञ $S_3$ **49c** वंश◦ ] $S_1$R**A**, (व)न्स◦ $S_3$, बंश◦ Bh (typo) • ◦खगोन्मिश्रः ] $S_1$, ◦खगोमिश्र $S_3$, ◦स्वनोन्मिश्रः Bh (conj.?) **49d** प्रलाप ] $S_1$R**A**Bh, प्रलोप $S_3$ **50a** शुक्रस्त◦ ] $S_3RA_4A_7Bh$ (em.?), शुक्र त◦ $S_1$ • ◦दाभ्येत्य ] $A_4A_7$, ◦दाभेत्य $S_1S_3Bh$ **50b** भृगोः ] $S_3$R**A**Bh, भृगो $S_1$ **50c** ◦मुवाचेदं ] $S_1^{pc}S_3$R**A**Bh, ◦⟨मि⟩+मु+वाचेदं $S_1$ **51a** महाशान्तिः ] $A_3A_4$, महाशान्ति $S_1S_3$, मया शान्तिः Bh (conj.?) **51b** दानवैः ] $S_1^{pc}S_3RBh$, दानव $S_1^{ac}$ **51c** सर्वान् ] $S_3RA_3A_7Bh$, सर्वा $S_1$

अहं त्वा स्वेन तपसा सह भृत्यैः सबान्धवम्।
धारयिष्यामि युध्यन्तं लोकान्यज्ञ इवापरः॥ ५२॥
ततः प्रदक्षिणं कृत्वा शुक्रं मूर्ध्ना प्रणम्य च।
भार्गवं पुरतः कृत्वा निर्जगाम स मन्दिरात्॥ ५३॥
ततो भेर्यश्च शङ्खाश्च पणवानकगोमुखाः।
आडम्बरा डिण्डिमाश्च भम्भाश्च पटहैः सह॥ ५४॥
झर्झर्यो दर्दुराश्चैव सुघोषा मर्दलास्तथा।
कटंकटाः पेपुकाश्च तथा चैवैकपुष्कराः॥ ५५॥
पञ्चाक्षाः परिधीकाश्च मुकुन्दा मुरजास्तथा।
लम्पाका जलमत्ताश्च अवाद्यन्त सहस्रशः॥ ५६॥
गायनैश्चैव गायद्भिः स्तुवद्भिः सूतमागधैः।
दिव्याभिः कुलवृद्धाभिः स्त्रीभिश्च कृतमङ्गलाः॥ ५७॥

---

**52a** त्वा स्वेन ] त्वार्घ्यनं R (unmetrical) **52b** सबान्धवम् ] सबान्धवैः R **53b** मूर्ध्ना ] कृत्वा R **54a** भेर्यश्च ] भेर्य्याश्च R **55a** झर्झर्यो दर्दुरा° ] झर्झरो डमरुका° R **55b** सुघोषा ] सघोषा R • मर्दला° ] ममला° R **55c** कटंकटाः पेपुकाश्च ] कङ्कटाः पेसकाश्चैव R **55d** °पुष्कराः ] °पुस्कराः R **56b** मुरजा° ] मुरुजा° R **56c** लम्पाका जलमत्ता° ] लम्बको जलमज्जा° R **57a** गायनै° ] गायना° R

---

**52a** त्वा ] त्वां **A** **52b** भृत्यैः ] $A_3A_4$, भृत्यै $A_7$ • सबान्धवम् ] सबांधवैः $A_3A_4$, सह बान्धवैः $A_7$ (unmetrical) **52c** युध्यन्तं ] युद्धार्थं $A_3A_4$, युध्यार्थं $A_7$ **53d** स ] स्व° **A** **54a** शङ्खाश्च ] $A_4$, रांखाश्च $A_3$, शङ्ख्श्च $A_7$ **54b** पणवानकगोमुखाः ] $A_3A_4$, पनवानकगोमुखा $A_7$ **54cd** ] om. **A** **55a** झर्झर्यो ] मनुपा **A** • दर्दुरा° ] दुर्द्धरा° $A_3$, दुद्धरा° $A_4$, दुर्द्धरा° $A_7$ **55b** मर्दला° ] $A_3$, मर्द्दना° $A_4$, मर्दन° $A_7$ **55c** कटंकटाः पेपुकाश्च ] कंटका येपु{°शु° $A_4$, °षु° $A_7$}काश्चैव **A** **55d** °पुष्कराः ] °पुस्कराः $A_4A_7$, °पुरा $A_3$ (unmetrical) **56** ] पञ्चाख्या परिधी{°धि° $A_7$(unmetrical)}काश्च कुमुदा सुरजास्तथा। नम्पाका जाल{जान् $A_3A_4$(unmetrical)}भाश्चैव तथा चैवैकपुष्कराः। **A**± (cf. 55d for 56d) **57** ] om. **A**

---

**52**⟨$c^1$–$c^3$⟩($c^4$–$c^5$) $S_3$ **53**($b^1$–$b^2$) $S_1$ **55**($b^2$–$b^3$) $S_1$, ($d^5$–$d^7$) $S_3$ **56**($c^1$–$c^2$) $S_1$

---

**52a** स्वेन ] $S_3$**A**Bh, सेन $S_1$ **52b** भृत्यैः ] R$A_3A_4$, भृत्यै $S_1S_3$, °भृत्यं Bh (conj.?) • सबान्धवम् ] $S_1$Bh, सबान्धवान् $S_3$ **52d** लोकान्यज्ञ इवापरः ] R**A**Bh, लोकान्यज्ञ इवामरः $S_1$, लोका यज्ञा इवापराः $S_3$ • After this Bh adds सनत्कुमार उवाच। **53b** शुक्रं ] $S_3$R**A**Bh, (शुक्र) $S_1$ **53d** मन्दिरात् ] $S_1$R**A**Bh, मन्दिरं $S_3$ **54b** पणवानक° ] $S_1$R$A_3A_4$Bh, पुणवानक° $S_3$ • °गोमुखाः ] $S_1^{pc}S_3$R$A_3A_4$Bh, °गोमुखा $S_1^{ac}$ **54c** आडम्बरा ] $S_1S_3$R, साडस्तमाः Bh (Bh adds (?); he probably reads this in $S_1$) • डिण्डिमा° ] $S_3$R, दिण्डिमा° $S_1$Bh **54d** भम्भाश्च ] $S_3$R, भाण्डाश्च $S_1$Bh • पटहैः ] RBh (em.?), पटहै $S_1$, पटहे $S_3$ **55a** झर्झर्यो दर्दुरा° ] em. Bh (silently), झज्झय्यो दर्दुरा° $S_1$, झलर्यो दुडुका° $S_3$ **55b** सुघोषा ] $S_1S_3$**A**, सुनवा Bh (conj.?) **55d** °पुष्कराः ] $S_3$, °पुष्कला $S_1$, °पुष्कलाः Bh (em.?) **56a** पञ्चाक्षाः ] RBh (em.?), पञ्चाक्षा $S_1$, पञ्चाक्ष° $S_3$ • परिधीका° ] $S_3$R$A_3A_4$, सरिधीका° $S_1$Bh **56b** मुकुन्दा ] $S_3$RBh (conj.), मुक्यन्दा $S_1$ **56c** लम्पाका ] $S_3$, (लप)का $S_1$, लभका Bh (Bh probably reads this in $S_1$) **56d** अवाद्यन्त ] $S_3$RBh (conj.?), यवान्यन्त $S_1$ **57a** गायनै° ] $S_3$Bh (conj.?), गायना° $S_1$ **57b** °द्भिः सूतमागधैः ] $S_3$RBh (em.?), °द्भि सूतमागधेः $S_1$ **57c** दिव्याभिः ] $S_3$RBh (em.?), दिव्याभि $S_1$ **57d** °मङ्गलाः ] $S_3$RBh (em.?), °मङ्गला $S_1$

द्वार्यपश्यन्नथं कॢप्तं यथा देवमयं हरः ।
शतनल्वप्रमाणं तं दिव्यं जाम्बूनदं दृढम् ॥ ५८ ॥
असङ्गतुरगैः श्वेतैस्त्रिसाहस्रैर्मनोजवैः ।
अमरैः कामगैर्दिव्यैः श्रमदुःखविवर्जितैः ॥ ५९ ॥
यन्ता रथस्य तस्यासीन्मकरो नाम विश्रुतः ।
पुत्रो गरुत्मतो व्यास खगः कामगमः शुभः ॥ ६० ॥
तमसौ जयशब्देन आशीर्भिश्चाभिपूजितः ।
आरुरोह रथं राजा एकचक्रं यथा रविः ॥ ६१ ॥
कवची बद्धतूणीरः शरी खड्गी शरासनी ।
बद्धगोधाङ्गुलित्रश्च कण्ठत्राणकृतस्तथा ॥ ६२ ॥
ध्वजेन महता चैव च्छत्त्रेण च विभूषितः ।
बह्वीभिर्वैजयन्तीभिः सबलाक इवाम्बुदः ॥ ६३ ॥
तस्य च्छत्त्रं तदा भाति किरीटोपरि संस्थितम् ।
सविद्युतः पयोदस्य पौर्णमास्यां यथा शशी ॥ ६४ ॥

---

**58a** कॢप्तं ] (क्लि)प्तं R **58c** ॰माणं तं ] ॰माणन्तु R **58d** दृढम् ] शुभम् R **59a** असङ्गतुर॰ ] असंख्यैस्तुर॰ R **59b** ॰स्त्रिसाहस्रै॰ ] ॰स्त्रिंसहस्रै॰ R **59c** काम॰ ] साम॰ R **61b** ॰श्चाभि॰ ] ॰श्चापि R **61d** ॰चक्रं यथा ] ॰चक्रमथो R **63d** इवाम्बुदः ] इवांशुदः R **64a** तस्य च्छत्त्रं ] च्छत्त्रं तस्य R

---

**58a** द्वार्य॰ ] $A_7$, त्वार्य॰ $A_3A_4$ • ॰पश्यन्नथं कॢप्तं ] ॰पथं रथं क्षिप्रं **A** **58b** देवमयं हरः ] दैवमहत्तरं $A_3A_4$, दैवमहंतरं $A_7$ **58c** ॰नल्व॰ ] ॰नन्यु॰ $A_3$, ॰मन्यु॰ $A_4A_7$ • ॰प्रमाणं ] $A_7$, ॰पुमानं $A_3A_4$ **58d** जाम्बू॰ ] $A_3$, जाम्बु॰ $A_4A_7$ **59ab** असङ्गतुरगैः श्वेतैस्त्रिसाहस्रै॰ ] आश{॰स॰ $A_7$}क्तं तुरगैर्दि{॰र्दी॰ $A_4$}व्यैस्त्रिसाहस्रै॰{॰श्रै॰ $A_7$} **A** **60a** यन्ता ] $A_3$, पंता $A_4$, मन्ता $A_7$ • तस्या॰ ] तत्रा॰ **A** **60c** पुत्रो ] पुरा **A** **61a** ॰शब्देन ] ॰सब्देन $A_7$, ॰थान्देन $A_3$, ॰थाब्देन $A_4$ **61b** आशीर्भि॰ ] आसीभि॰ **A** **62ab** ॰तूणीरः शरी ] ॰कूलीरो धन्वी **A** **62d** कण्ठत्राण॰ ] तनुत्राण॰ **A** **63c** बह्वी॰ ] बह्वि॰ $A_4$, बङ्की॰ $A_7$, बही॰ $A_3$ **64b** संस्थितम् ] संस्थितः **A** **64c** सविद्युतः ] $A_3$, सविद्यूत $A_4$, सविद्युत $A_7$

---

**58**(d$^3$–d$^4$) $S_1$ **59**(a$^2$) $S_1$ **61**(d$^6$) $S_1$

---

**58a** द्वार्य॰ ] $S_3RA_7Bh$ (conj.?), धार्य॰ $S_1$ • कॢप्तं ] $S_1Bh$, तप्तं $S_3^{pc}$, तपं $S_3^{ac}$ **58c** ॰नल्व॰ ] $S_3RBh$ (conj.?), ॰कल्व॰ $S_1$ • ॰प्रमाणं तं ] $A_7$, ॰प्रमानन्तं $S_3$, ॰प्रमाणाङ्कन् $S_1$, ॰प्रमाणाङ्कं Bh **58d** जाम्बूनदं ] $RA_3Bh$, (जांबू)नद $S_1$, जम्बूनदन् $S_3^{pc}$, जम्बूनन्दन् $S_3^{ac}$ (unmetrical) **59ab** श्वेतैस्त्रि॰ ] $S_3RBh$ (em.?), श्वेतै त्रि॰ $S_1$ **59b** ॰साहस्रैर् ] $S_1A_3A_4Bh$, ॰सहस्रै $S_3$ **59c** अमरैः ] $S_3$R**A**Bh, अमरै $S_1$ • कामगैर् ] $S_1$**A**Bh, कामगै $S_3$ **59d** श्रमदुःख॰ ] $S_3$R**A**Bh, श्रमन्दुःख॰ $S_1$ **60a** यन्ता ] $S_1^{pc}S_3RA_3Bh$, यन्त्रा $S_1^{ac}$ • तस्यासीन् ] $S_1S_3^{pc}RBh$, तस्यासी $S_3^{ac}$ **60c** गरुत्मतो ] $S_3$R**A**Bh, गरुत्वतो $S_1$ **61a** जय॰ ] $S_3$R**A**, राज॰ $S_1Bh$ **61b** आशीर्भि॰ ] RBh (em.?), आशीभि॰ $S_1S_3$ **62a** ॰तूणीरः ] RBh (em.?), ॰तूर्ण्णीर $S_1$, ॰तूणी च $S_3$ **62c** ॰गोधाङ्गुलि॰ ] $S_3$ R**A**Bh, ॰गोधांगुली॰ $S_1$ **63b** च्छत्त्रेण ] $S_1$R**A**Bh, शस्त्रेण $S_3$ • ॰भूषितः ] $S_3$R**A**Bh, ॰भूषिताः $S_1$ **63c** ॰भिर्वैजयन्तीभिः ] R**A**Bh, ॰भि वैजयन्तीभि $S_1S_3$ **63d** सबलाक ] $S_1$R**A**Bh, सबलाह $S_3$ **64b** संस्थितम् ] $S_1RBh$, सस्थितां $S_3$ **64c** सविद्युतः ] $S_3RA_3$, सविद्युत॰ $S_1$, आविष्कृत॰ Bh (conj.?) • पयोदस्य ] R**A**, पयोदश्च $S_3$, ॰पयोदाभा $S_1$, ॰पयोदाभः Bh (em.?) **64d** पौर्णमास्यां ] $S_1$R**A**Bh, पूर्णमास्या $S_3$

खट्वाङ्गं तस्य चाभाति ध्वजो दिवमिवाक्रमन्।
त्रैलोक्यस्योपघातादौ केतुर्दीप्त इवोदितः॥ ६५॥
तादृगेव रथो ऽस्यासीत्सुतस्य सुमहात्मनः।
अन्धकस्य तदा व्यास महाजलदनिस्वनः॥ ६६॥
अथ याहीति तेनोक्तो रथयन्ता सुरद्विषा।
त्रिसाहस्रान्हयाग्र्यांस्तु संरब्धः प्रत्यचूचुदत्॥ ६७॥
प्रचोदितास्तमूहुस्ते जवना वातरंहसः।
हयाः कामगमाः सप्त रवेरिव महारथम्॥ ६८॥
तस्याग्रतस्तदा शुक्रो रथेनाम्बुदनादिना।
उद्गच्छत इव व्योम्नि तस्यैवाभूद्यथा बुधः॥ ६९॥
दक्षिणे तस्य पार्श्वे च अभूदन्धकदानवः।
दक्षिणायनमासाद्य यथा लोकस्य भास्करः॥ ७०॥

---

**65a** खट्वाङ्गं ] खट्वाङ्ग R **65c** °घातादौ ] °घाताय R **65d** °दीप्त इवो° ] °दीघ हवो° R **66a** तादृगेव ] तादृशेव R • रथो ऽस्या° ] रथस्या° R **67a** तेनोक्तो ] तेनोक्ता R **67b** सुरद्विषा ] सुरद्विषां R **67c** °न्हयाग्र्यांस्तु ] °न् हयानन्यान् R **67d** संरब्धः ] सारथिः R • °चूचुदत् ] °ग्र(ह्ण)तत् $R^{pc}$, ⊔(द)त् $R^{ac}$ **68a** °तास्तमूहुस्ते ] °ताशु मुहुस्ते R **69c** उद्गच्छत ] उद्धच्छत R **69d** °वाभूद् ] °वासीद् R

---

**65b** ध्वजो दिवमिवाक्रमन् ] ध्वज दिव्य{°व्या° $A_7$}मिव द्रुमान् **A** **65c** °घातादौ ] °घाताय **A** **65d** केतुर् ] $A_3$, केतु $A_4A_7$ **66a** तादृगेव रथो ऽस्या° ] अदृश्ये च रथे ह्या° $A_3A_7$, अदृश्यो च रथे स्वा° $A_4$ **66b** °त्सुतस्य सु° ] °त्सुतस्तस्य **A** **66c** अन्धकस्य ] $A_4A_7$, अन्धकश्च $A_3$ • तदा ] तथा **A** **66d** °निस्वनः ] $A_3$, °नीस्वनः $A_4$, °निःस्वनः $A_7$ **67a** याहीति ] $A_3$, जाहीति $A_4$, वाहीति $A_7$ **67b** रथयन्ता सुरद्विषा ] कथयन्तां{°त्तां $A_3$} सुरद्विषां **A** **67c** °साहस्रान्हयाग्र्यांस्तु ] °साहस्रचां तथानां $A_3$ (unmetrical), °साहस्रचा तथाप्यामां $A_4$, °साहश्र्यं तथाप्यासां $A_7$ **67d** संरब्धः ] सारथिं $A_3A_4$, सारथिः $A_7$ • प्रत्यचूचुदत् ] प्रचुचूद तत $A_3$ (unmetrical), प्राचुचूदत् $A_4$ (unmetrical), प्रचुचुद तत् $A_7$ (unmetrical) **68a** °तास्तमूहुस्ते ] °तास्तदा तेन **A** **68b** जवना ] अश्वास्ते $A_3A_4$, अस्मास्ते $A_7$ • °रंहसः ] $A_3A_4$, °रंहिसः $A_7$ **69a** तस्या° ] तदा° **A** • शुक्रो ] शक्रो **A** **70d** लोकस्य ] त्रैलोक्य° **A**

---

**66**(a⁸) $S_1$ **69**(b⁴–b⁸) $S_1$

---

**65a** खट्वाङ्गं ] $S_3$**A**, खट्वाङ्गस् $S_1$Bh **65b** °क्रमन् ] $S_3$RBh (em.?), °क्रमम् $S_1$ **65c** °घातादौ ] $S_3$, °घाता वै $S_1$, °घातार्थं Bh (conj.?) **65d** केतुर् ] R$A_3$Bh, केतु $S_1S_3$ **66a** तादृगेव ] em. Bh (silently), तादृशेव $S_1S_3$ • °थो ऽस्यासीत् ] $S_3$, °थो ह्या(सी) $S_1$, °थो ह्यासीत् Bh **66c** अन्धकस्य ] $S_3$R$A_4A_7$Bh (em.?), अन्धतस्य $S_1$ **67a** तेनोक्तो ] $S_1$**A**, तेनोक्तै $S_3$, तेनोक्तौ Bh (typo?) **67b** सुरद्विषा ] $S_3$, सुरद्विषाः $S_1$, सुरद्विषः Bh (conj.?) **67c** °याग्र्यांस्तु ] em. Bh (silently), °याग्रास्तु $S_1$, °याग्र्यास्तां $S_3$ **67d** संरब्धः ] conj., यां रब्ध $S_1$, संरब्धं $S_3$, यान् रथे Bh (conj.?) • °चूचुदत् ] $S_3$Bh (conj.?), °चूचुद्यत् $S_1$ **68a** °तास्तमूहुस्ते ] $S_3$R, °ता तमूचुस्ते $S_1$, °तास्तमूढुस्ते Bh (typo?) **68b** °रंहसः ] $S_3$R$A_3A_4$Bh, °रंहसाः $S_1$ **68c** हयाः ] R**A**Bh, हया $S_1S_3$ • कामगमाः सप्त ] R**A**Bh, कामागमाः सप्त $S_1$, कामगमा सर्वे $S_3$ **69a** °ग्रतस्तदा ] $S_3$R**A**Bh, °ग्रतो तदा $S_1$ **69c** इव ] $S_3$R**A**Bh, इवा $S_1$ **70a** पार्श्वे ] $S_3$R**A**Bh, पाश्वे $S_1$ **70d** यथा ] $S_3$R**A**Bh, यचा $S_1$

द्वितीयं पार्श्वमाश्रित्य विप्रचित्तिरभूत्स्थितः।
भारतस्येव वर्षस्य हिमवान्पर्वतोत्तमः॥ ७१॥
पृष्ठतश्चाग्रतश्चैव यथाप्रीति ययुस्तथा।
अपरे दानवाः शूराः शशाङ्कस्य यथा ग्रहाः॥ ७२॥
तत्सैन्यं प्रचलं भाति व्रजन्तं मुनिसत्तम।
सविद्युत्स्तनयित्नूनामम्भोदानामिवात्यये॥ ७३॥
हयहेषितशब्दं च मत्तद्विरदबृंहितम्।
वल्गितास्फोटितोत्कुष्टं सिंहनादोद्धतं ययौ॥ ७४॥
तद्धि तूर्यरवसिंहनादितैरश्वहेषितगजोग्रबृंहितैः।
बाहुशब्दकुचितावनादितैर्याति दानवबलं भयावहम्॥ ७५॥

इति स्कन्दपुराणे सप्तसप्ततितमोऽध्यायः॥ ७७॥

---

**73a** ◦त्सैन्यं ] ◦त्सैन्य R **73c** ◦त्स्तनयित्नूनां ] ◦त्स्तननादानाम् $R^{pc}$, ◦त्स्त⊔नाम् $R^{ac}$ **74a** ह-य◦ ] दर्प◦ R **75a** ◦नादितैर् ] ◦नादैर् R (unmetrical) **75c** ◦शब्दकुचिताव◦ ] ◦शब्दाकुलित◦ R (unmetrical) **75d** भयावहम् ] भयावहमिति R (unmetrical) **Col.** इति स्कन्दपुराणे रेवाखण्डे दैत्यसन्नहनो नामाध्यायः R

---

**71a** ◦माश्रित्य ] ◦मासाद्य **A** **71c** भारतस्येव ] मारुतस्येव **A** **72a** पृष्ठ◦ ] $A_3$, पृष्ट◦ $A_4$, प्रष्ठ◦ $A_7$ **72b** ◦प्रीति ] ◦प्रीतं $A_3A_7$, ◦प्रीतिं $A_4$ • ◦स्तथा ] ◦स्तदा **A** **72c** ◦वाः शूराः ] ◦वास्तत्र **A** **72d** शशाङ्कस्य ] शशांकेन{◦ण $A_7$} **A** • ग्रहाः ] $A_3A_4$, भ्रुहा $A_7$ **73a** प्रचलं ] प्रलयं **A** • भाति ] याति $A_3A_7$, यांति $A_4$ **73b** ◦सत्तम ] ◦सत्तमं **A** **73cd** ◦यित्नूनामम्भोदा◦ ] ◦यितृतृणां अस्तोदा◦ $A_3$ (unmetrical), ◦पितृ्णां अस्तोदा◦ $A_4$, ◦यितृ्णां अम्भोदा◦ $A_7$ **74a** हयहेषित◦ ] $A_3$, हयह्रेशित◦ $A_4$, ईयह्नेसित◦ $A_7$ **74c** ◦स्फोटितोत्क्रुष्टं ] ◦स्फाटिताजु{◦यु◦ $A_4A_7$}ष्ट **A** **75a** तद्धि तूर्यरव◦ ] तद्विहार्यवर◦ $A_3A_4$, तद्विहारव◦ $A_7$ (unmetrical) **75b** ◦रश्व◦ ] ◦रस्य◦ $A_3A_4$, ◦रष्य◦ $A_7$ **75c** बाहु◦ ] बहुव◦ $A_3$, बहुवि◦ $A_4$, बहुर◦ $A_7$ (all unmetrical) • ◦कुचितावनादितैर् ] ◦कू{कु◦ $A_4^{ac}A_7$}जितनादैर् **A** (unmetrical) **75d** ◦र्याति ] ◦र्जात $A_3A_4$, ◦र्याचि $A_7$ **75d** ◦ब-लं ] $A_3$, ◦वनं $A_4$, ◦वरवणं $A_7$ (unmetrical) • भयावहम् ] भयावहमिति **A** (unmetrical) **Col.** इति{इति श्री◦ $A_3$} स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे ऽसुरयोगाध्यायः **A**±

---

**74**($c^2$–$c^3$) $S_1$, ($c^6$) $S_3$

---

**71a** ◦माश्रित्य ] $S_3$RBh (em.?), ◦माशृत्य $S_1$ **71b** ◦रभूत् ] $S_3$R**A**Bh, ◦रभू $S_1$ **71c** भारत-स्येव वर्षस्य ] RBh (conj.?), दारतस्यैव पर्षस्य $S_1$, भारतस्ये वर्षस्यस्य $S_3$ **72a** पृष्ठ◦ ] $S_1$R$A_3$Bh, पृष्ट◦ $S_3$ **72b** ◦प्रीति ] $S_3$RBh (em.?), ◦प्रीतिं $S_1$ • ◦स्तथा ] $S_3$R, ◦स्तदा $S_1$Bh **72c** ◦वाः शूराः ] RBh (em.?), ◦वा शूरा $S_1$, ◦वाः शूरा $S_3$ **72d** ग्रहाः ] R$A_3A_4$Bh, ग्रहः $S_3$, गुहाः $S_1$ **73a** प्रचलं ] $S_1S_3$R, प्रचलद् Bh (conj.?) **73b** व्रजन्तं ] $S_3$R**A**, व्रजन्त $S_1$, व्रजतां Bh (conj.?) • ◦सत्तम ] $S_1$RBh, ◦सत्तमः $S_3$ **73c** सविद्युत्स्त◦ ] $S_3$R**A**Bh, सविद्युस्त◦ $S_1$ • ◦नयित्नूना◦ ] $S_1$Bh, ◦नयिनूना◦ $S_3$ **73d** ◦मम्भोदाना◦ ] $S_3$R$A_7$, ◦मम्भोदान◦ $S_1$, ◦मभ्भोदाना◦ Bh (typo, em.?) **74a** हय◦ ] $S_1A_3A_4$Bh, हया◦ $S_3$ • ◦हेषित◦ ] $S_3$R$A_3$, ◦हेशित◦ $S_1$, ◦ह्रेषित◦ Bh (conj.?) **74b** मत्त◦ ] $S_1^{pc}S_3$R**A**Bh, मत्त्र◦ $S_1^{ac}$ **74c** ◦तोत्क्रुष्टं ] RBh (em.?), ◦तोक्रुष्टं $S_1$, (◦ता)क्रुष्ट◦ $S_3$ **75a** ◦रवसिंह◦ ] $S_1$R$A_7$Bh, ◦रवै सिह◦ $S_3$ (unmetrical) **75b** ◦हेषित◦ ] $S_1$R**A**Bh, ◦हेषितैः $S_3$ (unmetrical) • ◦बृंहितैः ] $S_1$R**A**Bh, ◦बृंहितै $S_3$ **75c** ◦कुचिताव◦ ] $S_1$Bh, ◦कुजितव◦ $S_3$ (unmetrical) • ◦नादितैर् ] $S_1S_3^{pc}$RBh, ◦नादितै $S_3^{ac}$ **75d** भयावहम् ] $S_3$Bh, भयावहमिति $S_1$ (इति part of col.) **Col.** ⊙ ॥ स्कन्दपुराणे हिरण्याक्षनिर्याणो ध्यायः १३३ (in letter numerals)॥ ⊙ $S_1$, ⊙ ॥ स्कन्दपुराणे नामाध्यायः ७६ (in letter numerals)॥ ⊙ $S_3$, इति स्कन्दपुराणे हिरण्याक्षनिर्याणं नाम सप्तसप्ततितमोध्यायः Bh

# अष्टसप्ततितमोऽध्यायः ।

व्यास उवाच ।
भगवन्दितिपुत्रेषु प्रयातेष्वमरावतीम् ।
अमराः किमकुर्वन्त एतदिच्छामि वेदितुम् ॥ १ ॥
कथं तद्विदितं तेषां को मन्त्रश्चेष्टितं च किम् ।
उत्तरं किं च देवास्ते प्रत्यपद्यन्त यत्नतः ॥ २ ॥
धार्मिकाश्च कृतज्ञाश्च विद्वांसश्छिन्नसंशयाः ।
इष्टाः सर्वस्य लोकस्य किमकुर्वन्त देवताः ॥ ३ ॥
सनत्कुमार उवाच ।
शृणु व्यास यथा देवा उत्तरं प्रतिपेदिरे ।
असुराणां च यद्युक्तं प्रत्यकुर्वन्त दंशिताः ॥ ४ ॥
उद्युक्तेष्वेव दैत्येषु देवानां भयसूचकाः ।
संजज्ञुरमरावत्यामुत्पाता दारुणा भृशम् ॥ ५ ॥

---

**2a** तद्विदितं ] तद्दितिजं R  **3b** °संशयाः ] °संशयः R  **4d** दंशिताः ] दर्शिताः R  **5a** उद्युक्तेष्वेव ] उ+दा(र्ये)+ष्वेव R  **5b** देवानां ] देवान° R  **5c** संजज्ञुर° ] संजग्मुर° R

---

**1b** प्रयातेष्व° ] $A_3$, प्रयातेस्व° $A_4A_7$  **1c** अमराः ] $A_3$, अमरा $A_4A_7$  **2a** तद्विदितं तेषां ] त{ता° $A_4$}द्विदितस्तेषां **A**  **2b** मन्त्रश्चेष्टितं च किम् ] मन्त्रः किं च{चा $A_4$} चेष्टितं $A_3A_4$, मन्त्र किञ्च चेष्टितः $A_7$  **2d** प्रत्यपद्यन्त यत्नतः ] रक्ष{°क्ष्य° $A_7$}न्ति सुरविद्विषां **A**  **3c** इष्टाः ] तुष्टाः $A_3A_7$, तुष्टा $A_4$ **3d** °कुर्वन्त ] $A_4A_7$, °कुर्वत $A_3$  **4–6** ] om. **A**

---

Manuscripts available for this chapter: $S_1$ photos 8.8b (f. $128^v$), 1.27b (f. $129^r$), 1.28a (f. $129^v$), 8.9b + 8.7 (f. $130^r$) and 8.10a + 8.6 (f. $130^v$) (the fragment, 8.7 and 8.6, is not collated by Bh); $S_3$ f. $129^r$–$131^r$; R f. $149^v$–$151^v$; $A_3$ f. $86^v$–$87^v$; $A_4$ f. $124^r$–$126^r$; $A_7$ f. $121^v$–$123^v$.
**1**⟨$a^6$⟩($c^6$) $S_1$  **4**($b^1$) $S_1$  **5**($b^8$) $S_1$

---

**1** व्यास ] $S_3$R**A**, कृष्णद्वैपायन $S_1$Bh  **1b** प्रयातेष्व° ] $S_3$R$A_3$Bh, प्रयातेश्व° $S_1$  **1c** अमराः ] R$A_3$Bh, अमरा $S_1S_3$  • °कुर्वन्त ] $S_1S_3$R**A**, °कुर्वन् त Bh  **1d** वेदितुम् ] $S_1S_3$R**A**, देदितुम् Bh (typo)  **2a** कथं तद्विदितं ] em., कथयन्तद्धितन् $S_1$, कथन्तद्वितितन् $S_3$, कथमन्तर्हितं Bh (conj.) **2b** मन्त्रश्चेष्टितं ] RBh (em.?), मन्त्र चेष्टितञ् $S_1$, मन्त्रश्चैष्टि⟨च⟩+तं+ $S_3$  **2c** उत्तरं किं च ] $S_3$RA Bh, उत्तरां किञ्चि $S_1^{ac}$, उत्तरां किञ्च $S_1^{pc}$  **3a** धार्मिका° ] $S_1$R**A**Bh, धार्मिक° $S_3$  • कृतज्ञा° ] $S_3$R**A**, वदन्या° $S_1$, वदान्या° Bh (em.?)  **3b** विद्वांसश्छिन्न° ] R**A**Bh, विद्वांसं छिन्न° $S_1$, व-द्वाङ्सच्छिन° $S_3$  **3c** इष्टाः ] RBh (em.?), इष्टा $S_1S_3$  **3d** °कुर्वन्त ] $S_1$R$A_4A_7$, °कुर्वत $S_3$Bh • देवताः ] $S_3^{pc}$R**A**Bh, देवता $S_1S_3^{ac}$  **4d** °कुर्वन्त ] $S_1S_3$R, °कुर्वत Bh (em.)  • दंशिताः ] em. Bh (silently), दंशिता $S_1$, दन्सिताः $S_3$  **5a** उद्युक्तेष्वेव ] $S_3$Bh (em.?), उद्युक्तेश्वेव $S_1$  **5b** °सूच-काः ] $S_3^{pc}$RBh (em.?), °सूचका $S_1S_3^{ac}$  **5c** संजज्ञुरम° ] em., संजज्ञरम° $S_1S_3$, संजज्ञिरेऽम° Bh (conj.)  **5cd** °रावत्यामु° ] $S_1$RBh, °रामर्त्यामु° $S_3$

पिशिताशाः खगास्तत्र भ्रमन्त्युपरि सर्वशः।
मम्लुर्माल्यानि देवानां गन्धश्चैवाशुभो ववौ॥ ६॥
हयादयो न हेषन्ते विमदाश्च गजाभवन्।
अनभ्रे भयदं वर्षमपतद्रुधिरं बहु॥ ७॥
आयुधानि च दीप्यन्ते सधूमं शक्तिनन्दन।
कबन्धान्धस्तदादित्यो युद्धं चात्र प्रदृश्यते।
द्वयोः पुरुषयोर्व्यास हाहाकारश्च सर्वशः॥ ८॥
देवानामरतिश्चैव चित्तं चापि समुत्सुकम्।
स्फुरन्ति वामनेत्राणि जृम्भिका चोपजायते॥ ९॥
खगा दीना विकूजन्ति भयदा ह्यपरे तथा।
अग्निश्च दीप्यते तत्र सशब्दो रूक्ष एव च॥ १०॥
एतांश्चान्यांश्च विविधानुत्पातान्भयसूचकान्।
दृष्ट्वा प्राह गुरुं शक्रो बृहस्पतिमिदं वचः॥ ११॥

---

**6c** मम्लुर्मा॰ ] अस्त्रमा॰ R **6d** गन्धश्चैवाशुभो ] मारुतश्चण्डतां R **7c** अनभ्रे ] अन्यत्र R **8a** दीप्यन्ते ] दीव्यन्ते R **8e** After this R adds two pādas reading दिष्ट्या युद्धं प्रवर्त्तते। श्रूयते सर्व्वदिक्चक्रे **8f** सर्वशः ] दुःखितः R **9b** समुत्सुकम् ] समुच्छ्रितम् R **10a** विकूजन्ति ] निकूजन्ति R **10b** ॰दा ह्यपरे ] ॰दान्यपरे R **10c** अग्निश्च ] अग्निषु R

---

